## ङिच्च । (५३/४३)

ङित् च य आदेशः सोऽनेकाल् अपि [1]अलोऽन्त्यस्य स्थाने भवति । 'आनङ् ऋतो द्वन्द्वे' (६.३.२५/९२१)–होतापोतारौ । मातापितरौ । तातङि[2] ङित्करणस्य गुणवृद्धिप्रतिषेधार्थत्वात् सर्वादेशः [3]तातङ् भवति । जीवताद् [4]भवान् । [5]जीवतात् (७.१.३५/२१९७) त्वम् ॥

## आदेः परस्य । (५४/४४)

परस्य [6]कार्यं शिष्यमाणमादेरलः प्रत्येतव्यम् । क्व च परस्य [7]कार्यम् शिष्यते ? यत्र पञ्चमीनिर्देशः । [8]तद् यथा– 'ईदासः' (७.२.८३/३१०४)–आसीनो [9]यजते । 'द्व्यन्तरुपसर्गेभ्योऽप ईत्' (६.३.९७/९४१)-[10]द्वीपम् । अन्तरीपम् । प्रतीपम् । समीपम् ॥

## अनेकाल्शित् सर्वस्य । (५५/४५)

अनेकाल् य आदेशः शित् च, स सर्वस्य [11]षष्ठीनिर्दिष्टस्य स्थाने भवति। 'अस्तेर्भूः' (२.४.५२/२४७०) – भविता । भवितुम् । भवितव्यम् । [12]शित् खल्वपि – '[13]जश्शसोः शिः' (७.१.२०/३१२) – कुण्डानि तिष्ठन्ति । कुण्डानि पश्य[14] ॥

## स्थानिवदादेशोऽनल्विधौ । (५६/४१)

स्थान्यादेशयोः [15]पृथक्त्वात् स्थान्याश्रयं कार्यमादेशे न प्राप्नोति [16]इत्ययमतिदेश आरभ्यते । [17]स्थानिना तुल्यं वर्तते इति स्थानिवत्[18] । स्थानिवदादेशो भवति स्थान्याश्रयेषु[19] कार्येष्वनलाश्रयेषु, स्थान्यलाश्रयाणि कार्याणि[20] वर्जयित्वा । न[21] अल्विधिरनल्विधिः इत्यर्थः । [22]किमुदाहरणम् ? धात्वङ्गकृत्तद्धिताव्ययसुप्तिङ्पदादेशाः[23] । धात्वादेशो धातुवद् भवति । 'अस्तेर्भूः' (२.४.५२/२४७०) । 'ब्रुवो वचिः' [24] (२.४.५३/२४५३) । आर्धधातुकविषये[25] प्रागेवादेशेषु [26]कृतेषु 'धातोः' (३.१.९१/२८२९) इति तव्यादयो भवन्ति । भविता । भवितुम् । भवितव्यम्[27] । वक्ता । वक्तुम् । वक्तव्यम्[28] ।

अङ्गादेशोऽङ्गवद् भवति[29]–केन । काभ्याम् । कैः । 'किमः कः' (७.२.१०३/३४२) इति कादेशे कृतेऽङ्गाश्रया इन-दीर्घत्व-ऐस्भावाः भवन्ति ।

कृदादेशः कृद्वद् भवति[30]–प्रकृत्य । प्रहृत्य[31] । क्त्वो ल्यबादेशे कृते 'ह्रस्वस्य पिति कृति तुक्'[32] (६.१.७१/२८५८) इति तुग् भवति ।

---

1. अलो नास्ति फ. ह, स्थाने नास्ति ई. ह, अल्स्थाने ग. 2. तातङो ड. 3. तातङ् नास्ति अ.क.ह. 4. भवान् नास्ति ह. 5. भवतात् ह. 6. कार्यं नास्ति फ, विधीयमानं कार्यं क. 7. परस्य आदेरेव भवति ह, परस्य शिष्यते ग. 8. तद् यथा नास्ति ग. 9. यजेत क. 10. द्वीपः । अन्तरीपः । प्रतीपः । समीपः क, प्रतीपम् नास्ति ग. फ. ह. न्या. पमं. 11. षष्ठी नास्ति ग. फ. 12. शितः फ, शित् खल्वपि नास्ति क. 13. जसः शी फ. 14. पश्यन्ति फ. 15. प्रथमत्वात् ह. 16. इत्यतिदेशः ग, इत्ययमारम्भः. अ 17.स्थानमस्यास्ति इति स्थानी इत्यधिकम् ह. 18. सादृश्ये वतिः इत्यधिकम् अ. 19. सत्सु इत्यधिकम् ड. 20. कार्याणि नास्ति फ. 21. अनल्विधिरनेकाल्विधिरित्यर्थः अ. 22. किं प्रयोजनम्? फ. 23. प्रयोजनम् इत्यधिकम् ड.फ.ह. 24. ब्रुवो वचिः नास्ति ग, इति इत्यधिकम् ह. 25. विषयभूते प्रत्ययोत्पत्तेरविशेषेषु ग. 26. कृतेषु नास्ति ड. 27. एतन्नास्ति क, भवितव्यः अ 28. नास्ति क. 29-30. भवति नास्ति क. 31. नास्ति अ. क., प्रद्रूत्य ब. 32. ङिति ह, तुक् नास्ति फ.